संस्कृत-वार्ता:

09.04.2024

सायम् - 06:20

## मुख्यवार्ता:

· त्रयोदश राज्येषु केन्द्रशासितप्रदेशेषु भविष्यमाणस्य द्वितीयचरणस्य लोकसभा-निर्वाचने दशाधिक-द्विशतोत्तरैकसहस्रं प्रत्याशिन: निर्वाचनसमरांगणे सन्ति।

· निर्वाचनायोगेन स्वतन्त्र निष्पक्ष लोकसभानिर्वाचनाय केन्द्रियगृहमन्त्रालय: पश्चिमबङ्गाले केन्द्रीय-सशस्त्र-अर्धसैन्य-बलस्य शताधिकाः अन्ये उद्यमाः नियोजयितुं निर्देशः दत्तः।

· कश्मीरीपण्डितैः कश्मीरस्य नववर्षस्य प्रथमदिवस:, नवरेह-उत्सवः अद्य आमान्यते।

· अंशदानविपणस्य संवेदी-सूचकांक: प्रथमवारं पंचसप्ततिसहस्रं यावत् सम्प्रात:, निफ्टीचेति नवीन-कीर्तिमत् शिखरं प्राप्तम्।

· आई.पी.एल्. क्रिकेटप्रतिस्पर्धायां: अद्य चण्डीगढस्य महाराजा-यादविन्द्रसिंह-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडांगणे पंजाब-किंग्स-सनराइजर्स-हैदराबाद दलयोर्मध्ये स्पर्धा भविष्यति।

## निर्वाचनायोग:द्वितीयचरणं

त्रयोदश राज्येषु केन्द्रशासितप्रदेशेषु भविष्यमाणस्य द्वितीयचरणस्य लोकसभा-निर्वाचने दशाधिक-द्विशतोत्तरैकसहस्रं प्रत्याशिन: निर्वाचनसमरांगणे सन्ति। निर्वाचनायोगेन संसूचितं यत् अष्टाशीति: आसनेभ्य: आहत्य त्रयस्त्रिंशदधिक-षड्शतोत्तर-द्वि-सहस्रं नामांकनानि भरितानि सन्ति। येषु अष्टाविंशत्यधिक-चतुश्शतोत्तरैकसहस्रं वैधत्वेन प्राप्तानि। ह्य: नामांकन-प्रत्यावर्तनस्य अन्तिमदिनम् आसीत्। द्वितीयचरणाय मतदानं षड्विंशे दिनांके भविता। एतस्मिन् द्वितीयचरणे केरलराज्यात् विंशति लोकसभासनेभ्य: सर्वाधिकं पंचशतं कर्णाटकराज्यात् चतुर्दश-लोकसभा-सनेभ्य: एकनवत्यधिक-चतुश्शतं नामांकनपत्राणि पूरितानि। त्रिपुराया: एकस्मात् लाकसभासनात् चतुर्दश-नामांकानपत्राणि प्राप्तानि। महाराष्ट्रस्य नांदेड लोकसभासनात् सर्वाधिकं द्विनवति नामांकनानि प्रपूरितानि।

## प्रधानमन्त्री -पीलीभीत

भाजपेतिदलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी उक्तवान् यत् भारतेन प्रदिर्शतं वर्तते यत् तस्य कृते किमपि असम्भवकार्यम् नास्ति। प्रधानमन्त्री अद्य उत्तरप्रदेशस्य पीलीभीत-जनपदे एकां नैर्वाचनिक-जनसभां सम्बोधयन् आसीत्। प्रधानमन्त्री अत्रावसरे सम्भाषितवान् यत् कांग्रेसप्रशासनं विश्वेन साहाय्यं याचयति परं च कोविड-महामार्या: अवधौ भारतेन सम्पूर्ण विश्वाय औषधय: सूच्यौषधयश्च सम्प्रेषिता:। तेन निगदितं यत् यदादेश: सबलत्वेन जात: तदा: सम्पूर्ण विश्वं तं देशं प्रति ध्यानेन श्रृण्वति। प्रधानमन्त्री अकथयत् यत् युवभ्य: वृत्यवसरा: सृजन्ति। कृषकेभ्य: प्रशासनस्य प्रयासान् उल्लेखन् कृषि-उत्पादने पीलीभीतस्य महत्वमपि प्रकाशितवान्। प्रतिपक्षदलानि विरूध्य असौ अवदत् यत् इण्ड-इत्याख्येन-संयुक्तदलेन राम-मन्दिर-निर्माणस्य विरोधकृत: । प्राणप्रतिष्ठायाश्च निमन्त्रणमपि अवहेलितम्। अवधेयं वर्तते यत् उत्तरप्रदेशस्य अष्ट-संसदीय-

आसनेषु अस्य मासस्य नवदशदिनांके लोकसभा-निर्वाचनस्य प्रथमे चरणे मतदानं भविष्यति। एते अष्ट संसदीय क्षेत्रा: सन्ति-सहारनपुरकैराना-मुजफ्फरनगर-बिजनौर-नगीना-मोरादाबाद-रामपुर-पीलीभीत:।

## केंद्रियगृहमन्त्रालय:

निर्वाचनायोगेन स्वतन्त्र निष्पक्ष लोकसभानिर्वाचनाय केन्द्रियगृहमन्त्रालयं पश्चिमबङ्गाले केन्द्रीय-सशस्त्र-अर्धसैन्य-बलस्य शताधिकाः अन्याः उद्यमाः नियोजयितुं निर्देशः दत्तः। सूत्रानुसारेण, आयोगस्य निर्देशेन गृहमन्त्रालयेन केन्द्रिय-रिज़र्व-आरक्षी-दलस्य पञ्चपञ्चाशत् उद्यमाः सुरक्षाबलस्य पञ्चचत्वारिंशत् उद्यमाः च नियोजिताः सन्ति।

## जम्मू-कश्मीरे

जम्मू-कश्मीरे अद्य कश्मीरीपण्डितैः नवरेह-उत्सवः आमान्यते। नवरेहः जम्मू-कश्मीरे कश्मीरी-पण्डितानां कश्मीरी-नववर्षस्य प्रथमदिवसस्य उत्सवः अस्ति। कश्मीरी पंडिताः नवरेह-उत्सवं स्वस्य देवी-शारीका देव्यै समर्पयन्ति, भक्ताः विश्वे समग्रस्य मानवजातेः कल्याणार्थं देवीं प्रार्थयन्ति।

## विदेशमन्त्री डॉ. एस जयशंकरः

अद्य नवदिल्लीनगरे विदेशमन्त्री डॉ. एस जयशंकरः बेल्जियमदेशस्य विदेशमन्त्रालयस्य महासचिवः 'थियोडोरा जेन्ट्जिस्' इत्यनेन सह मिलितवान्। एकस्मिन् अन्तर्जालीय संदेशे डॉ. जयशंकरः अवदत् यत् भारत-बेलजियम-यूरोपीयसङ्घानां च आर्थिक-राजनैतिक-सहकार्यस्य सुदृढीकरणस्य विषये चर्चां कृतवन्तः। डॉ. जयशंकरः अर्धचालकस्य, हरित-विकासस्य च विषये विचाराणां आदान-प्रदानं अपि कृतवान् ।

## दिल्ल्याः राउज़-एवेन्यू-न्यायालयः

दिल्ल्याः राउज़-एवेन्यू-न्यायालयेन दिल्ली-उत्पाद-शुल्क-नीति- प्रवञ्चनासम्बद्धे धनशोधन-प्रकरणे भारत-राष्ट्र-समीत्याः नेत्र्याः के-कवितायाः न्यायिक-करावासावधिः अस्मिन् मासस्य त्रयोविंशतिः दिनाङ्कपर्यन्तं समेधिताः। ह्यः दिल्लीन्यायालयेन विमोचनार्थं तस्याः याचना निरस्तीकृता।

## महा- विकास- अघाडी

महाराष्ट्रे महा-विकास-अघाडी दलेन आसन- आवण्टनस्य घोषणा कृता अस्ति । मुम्बईनगरे पत्रकारसम्मेलनं सम्बोधयन् एन.सी.पी. प्रमुखः शरदपवारः, शिवसेना-नेता उद्धवठाकरे, राज्यकाङ्ग्रेसस्य अध्यक्षः नानापाटोले च राज्यस्य अष्टचत्वारिंशत् सान्सदीय आसनानां आवण्टनस्य उद्घघोषणां कृतवन्तः। शिवसेना एकविंशतिः लोकसभाआसनेषु, काङ्ग्रेसपक्षः सप्तदश आसनेषु, एन.सी.पी महाराष्ट्रे दश आसनेषु च स्पर्धयिष्यन्ति ।

## सेंसेक्स

अंशदानविपणस्य संवेदी-सूचकांक: अद्य प्रात: प्रथमवारं पंचसप्ततिसहस्त्रं यावत् सम्प्रात:, निफ्टीचेति नवीन-कीर्तिमत् -शिखरं प्राप्तम्। प्रारम्भिक-व्यवसाये विपणस्य तीवग्रत्यां आईटी. इत्येतस्य अंशदानेषु क्रयणस्य योगदानानि अधिकं अभवत्।

## आई.पी.एल. क्रिकेट्

आई.पी.एल्. क्रिकेटप्रतिस्पर्धायां: अद्य चण्डीगढस्य महाराजा-यादविन्द्रसिंह-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडांगणे पंजाब-किंग्स-सनराइजर्स-हैदराबाद दलयोर्मध्ये स्पर्धा भविष्यति। अस्या: प्रसारणं सार्धसप्तवादने सायंकाले भविष्यति। ह्य: चेन्नैनगरस्य एम्.ए.चिदम्बरम्-क्रीडांगणे चेन्नैसुपरकिंग्स दलेन कोलकाता-नाइट-राइडर्स-दलं सप्त-क्रीडकै: पराजितम्।

## पर्वसन्देश:

चैत्रशुक्लादि-उगादी-गुडीपडवा-चेतीचन्द-नवरेह-साजीबू-चेइराओबा-पर्वणाम् शुभावसरे राष्ट्रपतिपदासीना द्रौपदीमुर्मु:, उपराष्ट्रपति: जगदीपधनखड:, प्रधानमन्त्री नरेन्द्रमोदी च जनेभ्य: शुभकामना: अयच्छन्। स्वीयसन्देशे राष्ट्रपति: प्रावोचत् यत् एतानि पर्वाणि नवसंवत्सरस्य वासन्तिकस्य स्वागताय विद्यन्ते। उपराष्ट्रपति: शुभसन्देशं प्रयच्छन् अकथयत् यत् एतानि पर्वाणि विभिन्नेषु राज्येषु विविधनामभि: ज्ञायन्ते तथापि आनन्दपद्धति एकैवास्ति। प्रधानमन्त्री शुभावसरे प्रोक्तवान् यत् अयं नूतनसंवत्सर: प्रत्येकं जनाय आनन्द-प्रसन्न-उच्चस्वास्थ्ययुतो भवेत्।

## जापानदेश-संयुक्तराष्ट्रं

जापानदेशीयस्य प्रधानमन्त्रिण: फुमिओ-किशिदा-इत्येतस्य चिरप्रतीक्षित वाशिंगटन अद्य समारब्धा। किशिदाइत्येतस्य पत्नी व्हाइटहाउस-इत्यस्मिन् भवने अद्य रात्रौ स्थास्यत:। यतो हि राष्ट्रपति: जोबाइडेन: तेन सह उत्सवं आमनयितुं इच्छति। जोबाइडेन: किशिदा: च श्व: पारस्परिक -चर्चार्थं उपस्थितौ भविष्यत:।

।। इति वार्ता : ।।